श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीपराशरमहर्षिप्रणीते श्रीविष्णुपुराणे

॥ षष्ठोंऽशः ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

विषयसूची

1 प्रथमोऽध्यायः 2

2 द्वितीयोऽध्यायः 8

3 तृतीयोऽध्यायः 13

4 चतुर्थोऽध्यायः 18

5 पञ्चमोऽध्यायः 23

6 षष्ठोऽध्यायः 32

7 सप्तमोऽध्यायः 38

8 अष्टमोऽध्यायः 49

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ षष्ठेंऽशे प्रथमोऽध्यायः ॥

श्रीमैत्रेय उवाच

व्याख्याता भवता सर्गवंशमन्वन्तरस्थितिः।
वंशानुचरितं चैव विस्तरेण महामुने ॥ 1 ॥ 1

श्रोतुमिच्छाम्यहं त्वत्तो यथावदुपसंहृतिम्।
महाप्रलयसंज्ञां च कल्पान्ते च महामुने ॥ 2 ॥ 2

श्रीपराशर उवाच

मैत्रेय श्रूयतां मत्तो यथावदुपसंहृतिः।
कल्पान्ते प्राकृते चैव प्रलये जायते यथा ॥ 3 ॥ 3

अहोरात्रं पितॄणां तु मासोऽब्दस्त्रिदिवौकसाम्।
चतुर्युगसहस्रे तु ब्रह्मणो वै द्विजोत्तम ॥ 4 ॥ 4

कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम्।
दिव्यैर्वर्षसहस्रैस्तु तद्द्वादशभिरुच्यते ॥ 5 ॥ 5

चतुर्युगाण्यशेषाणि सदृशानि स्वरूपतः।
आद्यं कृतयुगं मुक्त्वा मैत्रेयान्त्यं तथा कलिम् ॥ 6 ॥ 6

आद्ये कृतयुगे सर्गो ब्रह्मणा क्रियते यथा।
क्रियते चोपसंहारस्तथान्ते च कलौ युगे ॥ 7 ॥ 7

श्रीमैत्रेय उवाच

कलेस्स्वरूपं भगवन्विस्तराद्वक्तुमर्हसि।
धर्मश्चतुष्पाद्भगवान्यस्मिन्विप्लवमृच्छति॥ 8॥ 8

श्रीपराशर उवाच

कलेस्स्वरूपं मैत्रेय यद्भवाञ्छ्रोतुमिच्छति।
तन्निबोध समासेन वर्तते यन्महामुने॥ 9॥ 9

वर्णाश्रमाचारवती प्रवृत्तिर्न कलौ नृणाम्।
न सामऋग्यजुर्धर्मविनिष्पादनहैतुकी॥ 10॥ 10

विवाह्य न कलौ धर्म्या न शिष्यगुरुसंस्थितिः।
न दाम्पत्यक्रमो नैव वह्निदेवात्मकः क्रमः॥ 11॥ 11

यत्र कुत्र कुले जातो बली सर्वेश्वरः कलौ।
सर्वेभ्य एव वर्णेभ्यो योग्यः कन्यावरोधने॥ 12॥ 12

येन केन च योगेन द्विजातिर्दीक्षितः कलौ।
यैव सैव च मैत्रेय प्रायश्चित्तं कलौ क्रिया॥ 13॥ 13

सर्वमेव कलौ शास्त्रं यस्य यद्वचनं द्विज।
देवता च कलौ सर्वा सर्वस्सर्वस्य चाश्रमः॥ 14॥ 14

उपवासस्तथायासो वित्तोत्सर्गस्तपः कलौ।
धर्मो यथाभिरुचितैरनुष्ठानैरनुष्ठितः॥ 15॥ 15

वित्तेन भविता पुंसां स्वल्पेनाढ्यमदः कलौ।
स्त्रीणां रूपमदश्चैवं केशैरेव भविष्यति॥ 16॥ 16

सुवर्णमणिरत्नादौ वस्त्रे चोपक्षयं गते।
कलौ स्त्रियो भविष्यन्ति तदा केशैरलङ्कृताः॥ 17॥ 17

परित्यक्ष्यन्ति भर्त्तारं वित्तहीनं तथा स्त्रियः।
भर्त्ता भविष्यति कलौ वित्तवानेव योषिताम्॥ **18**॥ 18

यो वै ददाति बहुलं स्वं स स्वामी सदा नृणाम्।
स्वामित्वहेतुस्सम्बन्धो न चाभिजनता तथा॥ **19**॥ 19

गृहान्ता द्रव्यसङ्घाता द्रव्यान्ता च तथा मतिः।
अर्थाश्चात्मोपभोग्यान्ता भविष्यन्ति कलौ युगे॥ **20**॥ 20

स्त्रियः कलौ भविष्यन्ति स्वैरिण्यो ललितस्पृहाः।
अन्यायावाप्तवित्तेषु पुरुषाः स्पृहयालवः॥ **21**॥ 21

अभ्यर्थितापि सुहृदा स्वार्थहानिं न मानवाः।
पणार्धार्धार्द्धमात्रेऽपि करिष्यन्ति कलौ द्विज॥ **22**॥ 22

समानपौरुषं चेतो भावि विप्रेषु वै कलौ।
क्षीरप्रदानसम्बन्धि भावि गोषु च गौरवम्॥ **23**॥ 23

अनावृष्टिभयप्रायाः प्रजाः क्षुद्भयकातराः।
भविष्यन्ति तदा सर्वे गगनासक्तदृष्टयः॥ **24**॥ 24

कन्दमूलफलाहारास्तापसा इव मानवाः।
आत्मानं घातयिष्यन्ति ह्यनावृष्ट्यादिदुःखिताः॥ **25**॥ 25

दुर्भिक्षमेव सततं तथा क्लेशमनीश्वराः।
प्राप्स्यन्ति व्याहतसुखप्रमोदा मानवाः कलौ॥ **26**॥ 26

अस्नानभोजिनो नाग्निदेवतातिथिपूजनम्।
करिष्यन्ति कलौ प्राप्ते न च पिण्डोदकक्रियाम्॥ **27**॥ 27

लोलुपा ह्रस्वदेहाश्च बह्वन्नादनतत्पराः।
बहुप्रजाल्पभाग्याश्च भविष्यन्ति कलौ स्त्रियः॥ **28**॥ 28

उभाभ्यामपि पाणिभ्यां शिरः कण्डूयनं स्त्रियः।
कुर्वन्त्यो गुरुभर्तृर्णामाज्ञां भेत्स्यन्त्यनादराः॥ 29॥ 29

स्वपोषणपराः क्षुद्रा देहसंस्कारवर्जिताः।
परुषानृतभाषिण्यो भविष्यन्ति कलौ स्त्रियः॥ 30॥ 30

दुःशीला दुष्टशीलेषु कुर्वन्त्यस्सततं स्पृहाम्।
असद्वृत्ता भविष्यन्ति पुरुषेषु कुलाङ्गनाः॥ 31॥ 31

वेदादानं करिष्यन्ति वटवश्चाकृतव्रताः।
गृहस्थाश्च न होष्यन्ति न दास्यन्त्युचितान्यपि॥ 32॥ 32

वानप्रस्था भविष्यन्ति ग्राम्याहारपरिग्रहाः।
भिक्षवश्चापि मित्रादिस्नेहसम्बन्धयन्त्रणाः॥ 33॥ 33

अरक्षितारो हर्त्तारश्शुल्कव्याजेन पार्थिवाः।
हारिणो जनवित्तानां सम्प्राप्ते तु कलौ युगे॥ 34॥ 34

यो योऽश्वरथनागाढ्यस्स स राजा भविष्यति।
यश्च यश्चाबलस्सर्वस्स भृत्यः कलौ युगे॥ 35॥ 35

वैश्याः कृषिवणिज्यादि सन्त्यज्य निजकर्म यत्।
शूद्रवृत्त्या प्रवर्त्स्यन्ति कारुकर्मोपजीविनः॥ 36॥ 36

भैक्षव्रतपराः शूद्राः प्रव्रज्यालिङ्गिनोऽधमाः।
पाषण्डसंश्रयां वृत्तिमाश्रयिष्यन्ति सत्कृताः॥ 37॥ 37

दुर्भिक्षकरपीडाभिरतीवोपद्रुता जनाः।
गोधूमान्नयवान्नाढ्यान्देशान्यास्यन्ति दुःखिताः॥ 38॥ 38

वेदमार्गे प्रलीने च पाषण्डाढ्ये ततो जने।
अधर्मवृद्ध्या लोकानामल्पमायुर्भविष्यति॥ 39॥ 39

अशास्त्रविहितं घोरं तप्यमानेषु वै तपः।
नरेषु नृपदोषेण बाल्ये मृत्युर्भविष्यति॥ **40**॥ 40

भविता योषितां सूतिः पञ्चषट्पञ्चवार्षिकी।
नवाष्टदशवर्षाणां मनुष्याणां तथा कलौ॥ **41**॥ 41

पलितोद्भवश्च भविता तथा द्वादशवार्षिकः।
नातिजीवति वै कश्चित्कलौ वर्षाणि विंशतिः॥ **42**॥ 42

अल्पप्रज्ञा वृथालिङ्गा दुष्टान्तः करणाः कलौ।
यतस्ततो विनङ्क्ष्यन्ति कालेनाल्पेन मानवाः॥ **43**॥ 43

यदा यदा हि मैत्रेय हानिर्धर्मस्य लक्ष्यते।
तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः॥ **44**॥ 44

यदा यदा हि पाषण्डवृद्धिर्मैत्रेय लक्ष्यते।
तदा तदा कलेर्वृद्धिरनुमेया महात्मभिः॥ **45**॥ 45

यदा यदा सतां हानिर्वेदमार्गानुसारिणाम्।
तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः॥ **46**॥ 46

प्रारभ्भाश्चावसीदन्ति यदा धर्मभृतां नृणाम्।
तदानुमेयं प्राधान्यं कलेर्मैत्रेय पण्डितैः॥ **47**॥ 47

यदा यदा न यज्ञानामीश्वरः पुरुषोत्तमः।
इज्यते पुरुषैर्यज्ञैस्तदा ज्ञेयं कलेर्बलम्॥ **48**॥ 48

न प्रीतिर्वेदवादेषु पाषण्डेषु यदा रतिः।
कलेर्वृद्धिस्तदा प्राज्ञैरनुमेया विचक्षणैः॥ **49**॥ 49

कलौ जगत्पतिं विष्णुं सर्वस्रष्टारमीश्वरम्।
नार्चयिष्यन्ति मैत्रेय पाषण्डोपहता जनाः॥ **50**॥ 50

किं देवैः किं द्विजैर्वेदैः किं शौचेनाम्बुजन्मना।
इत्येवं विप्र वक्ष्यन्ति पाषण्डोपहता जनाः॥ 51॥ 51

स्वल्पाम्बुवृष्टिः पर्जन्यः सस्यं स्वल्पफलं तथा।
फलं तथाल्पसारं च विप्र प्राप्ते कलौ युगे॥ 52॥ 52

शाणीप्रायाणि वस्त्राणि शमीप्राया महीरुहाः।
शूद्रप्रायास्तथा वर्णा भविष्यन्ति कलौ युगे॥ 53॥ 53

अणुप्रायाणि धान्यानि अजाप्रायं तथा पयः।
भविष्यति कलौ प्राप्ते ह्यौशीरं चानुलेपनम्॥ 54॥ 54

श्वश्रूश्वशुरभूयिष्ठा गुरवश्च नृणां कलौ।
श्यालाद्या हारिभार्याश्च सुहृदो मुनिसत्तम॥ 55॥ 55

कस्य माता पिता कस्य यथा कर्मानुगः पुमान्।
इति चोदाहरिष्यन्ति श्वशुरानुगता नराः॥ 56॥ 56

वाङ्मनःकायजैर्दोषैरभिभूताः पुनः पुनः।
नराः पापान्यनुदिनं करिष्यन्त्यल्पमेधसः॥ 57॥ 57

निस्सत्त्वानामशौचानां निर्हीकाणां तथा नृणाम्।
यद्यद्दुःखाय तत्सर्वं कलिकाले भविष्यति॥ 58॥ 58

निस्स्वाध्यायवषट्कारे स्वधास्वाहाविवर्जिते।
तदा प्रविरलो धर्मः क्वचिल्लोके निवत्स्यति॥ 59॥ 59

तत्राल्पेनैव यत्नेन पुण्यस्कन्धमनुत्तमम्।
करोति यं कृतयुगे क्रियते तपसा हि सः॥ 60॥ 60

॥ इति श्रीविष्णुपुराणे षष्ठेंऽशे प्रथमोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ षष्ठेंऽशे द्वितीयोऽध्यायः ॥

श्रीपराशर उवाच

व्यासश्चाह महाबुद्धिर्यदत्रैव हि वस्तुनि।
तच्छ्रयतां महाभाग गदतो मम तत्त्वतः॥ 1 ॥ 61

कस्मिन्कालेऽल्पको धर्मो ददाति सुमहत्फलम्।
मुनीनां पुण्यवादोऽभूत्कैश्चासौ क्रियते सुखम्॥ 2 ॥ 62

सन्देहनिर्णयार्थाय वेदव्यासं महामुनिम्।
ययुस्ते संशयं प्रष्टुं मैत्रेय मुनिपुङ्गवाः॥ 3 ॥ 63

ददृशुस्ते मुनिं तत्र जाह्नवीसलिले द्विज।
वेदव्यासं महाभागमर्द्धस्नातं सुतं मम॥ 4 ॥ 64

स्नानावसानं ते तस्य प्रतीक्षन्तो महर्षयः।
तस्थुस्तीरे महानद्यास्तरुषण्डमुपाश्रिताः॥ 5 ॥ 65

मग्नोऽथ जाह्नवीतोयादुत्थायाह सुतो मम।
शूद्रस्साधुः कलिस्साधुरित्येवं शृण्वतां वचः॥ 6 ॥ 66

तेषां मुनीनां भूयश्च ममज्ज स नदीजले।
साधु साध्विति चोत्थाय शूद्र धन्योऽसि चाब्रवीत्॥ 7 ॥ 67

निमग्नश्च समुत्थाय पुनः प्राह महामुनिः।
योषितः साधु धन्यास्तास्ताभ्यो धन्यतरोऽस्ति कः॥ 8 ॥ 68

ततः स्नात्वा यथान्यायमायान्तं च कृतक्रियम्।
उपतस्थुर्महाभागं मुनयस्ते सुतं मम॥ 9॥ 69

कृतसंवन्दनांश्चाह कृतासनपरिग्रहान्।
किमर्थमागता यूयमिति सत्यवतीसुतः॥ 10॥ 70

तमूचुः संशयं प्रष्टुं भवन्तं वयमागताः।
अलं तेनास्तु तावन्नः कथ्यतामपरं त्वया॥ 11॥ 71

कलिस्साध्विति यत्प्रोक्तं शूद्रः साध्विति योषितः।
यदाह भगवान् साधु धन्याश्चेति पुनः पुनः॥ 12॥ 72

तत्सर्वं श्रोतुमिच्छामो न चेद् गुह्यं महामुने।
तत्कथ्यतां ततो हृत्स्थं पृच्छामस्त्वां प्रयोजनम्॥ 13॥ 73

श्रीपराशर उवाच

इत्युक्तो मुनिभिर्व्यासः प्रहस्येदमथाब्रवीत्।
श्रूयतां भो मुनिश्रेष्ठा यदुक्तं साधु साध्विति॥ 14॥ 74

श्रीव्यास उवाच

यत्कृते दशभिर्वर्षैस्त्रेतायां हायनेन तत्।
द्वापरे तच्च मासेन ह्यहोरात्रेण तत्कलौ॥ 15॥ 75

तपसो ब्रह्मचर्यस्य जपादेश्च फलं द्विजाः।
प्राप्नोति पुरुषस्तेन कलिस्साध्विति भाषितम्॥ 16॥ 76

ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन्।
यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम्॥ 17॥ 77

धर्मोत्कर्षमतीवात्र प्राप्नोति पुरुषः कलौ।
अल्पायासेन धर्मज्ञास्तेन तुष्टोऽस्म्यहं कलेः॥ 18॥ 78

व्रतचर्यापरैर्ग्राह्या वेदाः पूर्वं द्विजातिभिः।
ततस्स्वधर्मसम्प्राप्तैर्यष्टव्यं विधिवद्धनैः॥ **19**॥ 79

वृथा कथा वृथा भोज्यं वृथेज्या च द्विजन्मनाम्।
पतनाय ततो भाव्यं तैस्तु संयमिभिस्सदा॥ **20**॥ 80

असम्यक्करणे दोषस्तेषां सर्वेषु वस्तुषु।
भोज्यपेयादिकं चैषां नेच्छाप्राप्तिकरं द्विजाः॥ **21**॥ 81

पारतन्त्र्यं समस्तेषु तेषां कार्येषु वै यतः।
जयन्ति ते निजागुंल्लोकान्क्लेशेन महता द्विजाः॥ **22**॥ 82

द्विजशुश्रूषयैवैष पाकयज्ञाधिकारवान्।
निजाञ्जयति वै लोकाञ्च्छूद्रो धन्यतरस्ततः॥ **23**॥ 83

भक्ष्याभक्ष्येषु नास्यास्ति पेयापेयेषु वै यतः।
नियमो मुनिशार्दूलास्तेनासौ साध्वितीरितः॥ **24**॥ 84

स्वधर्मस्याविरोधेन नरैर्लब्धं धनं सदा।
प्रतिपादनीयं पात्रेषु यष्टव्यं च यथाविधि॥ **25**॥ 85

तस्यार्जने महाक्लेशः पालने च द्विजोत्तमाः।
तथासद्विनियोगेन विज्ञातं गहनं नृणाम्॥ **26**॥ 86

एवमन्यैस्तथा क्लेशैः पुरुषा द्विजसत्तमाः।
निजाञ्जयन्ति वै लोकान्प्राजापत्यादिकान्क्रमात्॥ **27**॥ 87

योषिच्छुश्रूषणाद्भर्त्तुः कर्मणा मनसा गिरा।
तद्धिता शुभमाप्नोति तत्सालोक्यं यतो द्विजाः॥ **28**॥ 88

नातिक्लेशेन महता तानेव पुरुषो यथा।
तृतीयं व्याहृतं तेन मया साध्विति योषितः॥ **29**॥ 89

एतद्वः कथितं विप्रा यन्निमित्तमिहागताः।
तत्पृच्छत यथाकामं सर्वं वक्ष्यामि वः स्फुटम्॥ 30॥ 90

ऋषयस्ते ततः प्रोचुर्यत्प्रष्टव्यं महामुने।
अस्मिन्नेव च तत् प्रश्ने यथावत्कथितं त्वया॥ 31॥ 91

श्रीपराशर उवाच

ततः प्रहस्य तानाह कृष्णद्वैपायनो मुनिः।
विस्मयोत्फुल्लनयनांस्तापसांस्तानुपागतान्॥ 32॥ 92

मयैष भवतां प्रश्नो ज्ञातो दिव्येन चक्षुषा।
ततो हि वः प्रसङ्गेन साधु साध्विति भाषितम्॥ 33॥ 93

स्वल्पेन हि प्रयत्नेन धर्मस्सिद्ध्यति वै कलौ।
नरैरात्मगुणाम्भोभिः क्षालिताखिलकिल्बिषैः॥ 34॥ 94

शूद्रैश्च द्विजशुश्रूषातत्परैर्द्विजसत्तमाः।
तथा स्त्रीभिरनायासात्पतिशुश्रूषयैव हि॥ 35॥ 95

ततस्त्रितयमप्येतन्मम धन्यतरं मतम्।
धर्मसम्पादने क्लेशो द्विजातीनां कृतादिषु॥ 36॥ 96

भवद्भिर्यदभिप्रेतं तदेतत्कथितं मया।
अपृष्टेनापि धर्मज्ञाः किमन्यत्क्रियतां द्विजाः॥ 37॥ 97

श्रीपराशर उवाच

ततस्सम्पूज्य ते व्यासं प्रशशंसुः पुनः पुनः।
यथाऽऽगतं द्विजा जग्मुर्व्यासोक्तिकृतनिश्चयाः॥ 38॥ 98

भवतोऽपि महाभाग रहस्यं कथितं मया।
अत्यन्तदुष्टस्य कलेरयमेको महान्गुणः।
कीर्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत्॥ **39**॥ 99

यच्चाहं भवता पृष्टो जगतामुपसंहृतिम्।
प्राकृतामन्तरालां च तामप्येष वदामि ते॥ **40**॥ 100

॥ इति श्रीविष्णुपुराणे षष्ठेंऽशे द्वितीयोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ षष्ठेंऽशे तृतीयोऽध्यायः ॥

श्रीपराशर उवाच

सर्वेषामेव भूतानां त्रिविधः प्रतिसञ्चरः। 101
नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको लयः ॥ 1 ॥

ब्राह्मो नैमित्तिकस्तेषां कल्पान्ते प्रतिसञ्चरः। 102
आत्यन्तिकस्तु मोक्षाख्यः प्राकृतो द्विपरार्द्धकः ॥ 2 ॥

श्रीमैत्रेय उवाच

परार्द्धसंख्यां भगवन्ममाचक्ष्व यया तु सः। 103
द्विगुणीकृतया ज्ञेयः प्राकृतः प्रतिसञ्चरः ॥ 3 ॥

श्रीपराशर उवाच

स्थानात्स्थानं दशगुणमेकस्माद्गण्यते द्विज। 104
ततोऽष्टादशमे भागे परार्द्धमभिधीयते ॥ 4 ॥

परार्द्धद्विगुणं यत्तु प्राकृतस्स लयो द्विज। 105
तदाव्यक्तेऽखिलं व्यक्तं स्वहेतौ लयमेति वै ॥ 5 ॥

निमेषो मानुषो योऽसौ मात्रा मात्राप्रमाणतः। 106
तैः पञ्चदशभिः काष्ठा त्रिंशत्काष्ठा कला स्मृता ॥ 6 ॥

नाडिका तु प्रमाणेन सा कला दश पञ्च च। 107
उन्मानेनाम्भसस्सा तु पलान्यर्द्धत्रयोदश ॥ 7 ॥

मागधेन तु मानेन जलप्रस्थस्तु स स्मृतः।
हेममाषैः कृतच्छिद्रश्चतुर्भिश्चतुरङ्गुलैः॥ 8॥ 108

नाडिकाभ्यामथ द्वाभ्यां मुहूर्तो द्विजसत्तम।
अहोरात्रं मुहूर्तास्तु त्रिंशन्मासो दिनैस्तथा॥ 9॥ 109

मासैर्द्वादशभिर्वर्षमहोरात्रं तु तद्दिवि।
त्रिभिर्वर्षशतैर्वर्षं षष्ट्या चैवासुरद्विषाम्॥ 10॥ 110

तैस्तु द्वादशसाहस्रैश्चतुर्युगमुदाहृतम्।
चतुर्युगसहस्रं तु कथ्यते ब्रह्मणो दिनम्॥ 11॥ 111

स कल्पस्तत्र मनवश्चतुर्दश महामुने।
तदन्ते चैव मैत्रेय ब्राह्मो नैमित्तिको लयः॥ 12॥ 112

तस्य स्वरूपमत्युग्रं मैत्रेय गदतो मम।
शृणुष्व प्राकृतं भूयस्तव वक्ष्याम्यहं लयम्॥ 13॥ 113

चतुर्युगसहस्रान्ते क्षीणप्राये महीतले।
अनावृष्टिरतीवोग्रा जायते शतवार्षिकी॥ 14॥ 114

ततो यान्यल्पसाराणि तानि सत्त्वान्यशेषतः।
क्षयं यान्ति मुनिश्रेष्ठ पार्थिवान्यनुपीडनात्॥ 15॥ 115

ततः स भगवान्विष्णू रुद्ररूपधरोऽव्ययः।
क्षयाय यतते कर्तुमात्मस्थास्सकलाः प्रजाः॥ 16॥ 116

ततस्स भगवान्विष्णुर्भानोस्सप्तसु रश्मिषु।
स्थितः पिबत्यशेषाणि जलानि मुनिसत्तम॥ 17॥ 117

पीत्वाम्भांसि समस्तानि प्राणिभूमिगतान्यपि।
शोषं नयति मैत्रेय समस्तं पृथिवीतलम्॥ 18॥ 118

समुद्रान्सरितः शैलनदीप्रस्रवणानि च।
पातालेषु च यत्तोयं तत्सर्वं नयति क्षयम्॥ 19॥ 119

ततस्तस्यानुभावेन तोयाहारोपबृंहिताः।
त एव रश्मयस्सप्त जायन्ते सप्त भास्कराः॥ 20॥ 120

अधश्चोर्ध्वं च ते दीप्तास्ततस्सप्त दिवाकराः।
दहन्त्यशेषं त्रैलोक्यं सपातालतलं द्विज॥ 21॥ 121

दह्यमानं तु तैर्दीप्तैस्त्रैलोक्यं द्विज भास्करैः।
साद्रिनद्यर्णवाभोगं निस्नेहमभिजायते॥ 22॥ 122

ततो निर्दग्धवृक्षाम्बु त्रैलोक्यमखिलं द्विज।
भवत्येषा च वसुधा कूर्मपृष्ठोपमाकृतिः॥ 23॥ 123

ततः कालाग्निरुद्रोऽसौ भूत्वा सर्वहरो हरिः।
शेषाहिश्वाससम्भूतः पातालानि दहत्यधः॥ 24॥ 124

पातालानि समस्तानि स दग्ध्वा ज्वलनो महान्।
भूमिमभ्येत्य सकलं बभस्ति वसुधातलम्॥ 25॥ 125

भुवर्लोकं ततस्सर्वं स्वर्लोकं च सुदारुणः।
ज्वालामालामहावर्तस्तत्रैव परिवर्तते॥ 26॥ 126

अम्बरीषमिवाभाति त्रैलोक्यमखिलं तदा।
ज्वालावर्तपरीवारमुपक्षीणचराचरम्॥ 27॥ 127

ततस्तापपरीतास्तु लोकद्वयनिवासिनः।
कृताधिकारा गच्छन्ति महर्लोकं महामुने॥ 28॥ 128

तस्मादपि महातापतप्ता लोकात्ततः परम्।
गच्छन्ति जनलोकं ते दशावृत्त्या परैषिणः॥ 29॥ 129

ततो दग्ध्वा जगत्सर्वं रुद्ररूपी जनार्दनः।
मुखनिःश्वासजान्मेघान्करोति मुनिसत्तम ॥ 30 ॥ 130

ततो गजकुलप्रख्यास्तडित्वन्तोऽतिनादिनः।
उत्तिष्ठन्ति तथा व्योम्नि घोरास्संवर्तका घनाः ॥ 31 ॥ 131

केचिन्नीलोत्पलश्यामाः केचित्कुमुदसन्निभाः।
धूम्रवर्णा घनाः केचित्केचित्पीताः पयोधराः ॥ 32 ॥ 132

केचिद्रासभवर्णाभा लाक्षारसनिभास्तथा।
केचिद्वैडूर्यसंकाशा इन्द्रनीलनिभाः क्वचित् ॥ 33 ॥ 133

शङ्खकुन्दनिभाश्चान्ये जात्यञ्जननिभाः परे।
इन्द्रगोपनिभाः केचित्ततश्शिखिनिभास्तथा ॥ 34 ॥ 134

मनश्शिलाभाः केचिद्वै हरितालनिभाः परे।
चाषपत्रनिभाः केचिदुत्तिष्ठन्ते महाघनाः ॥ 35 ॥ 135

केचित्पुरवराकाराः केचित्पर्वतसन्निभाः।
कूटागारनिभाश्चान्ये केचित्स्थलनिभा घनाः ॥ 36 ॥ 136

महारावा महाकायाः पूरयन्ति नभःस्थलम्।
वर्षन्तस्ते महासारांस्तमग्निमतिभैरवम्।
शमयन्त्यखिलं विप्र त्रैलोक्यान्तरधिष्ठितम् ॥ 37 ॥ 137

नष्टे चाग्नौ च सततं वर्षमाणा ह्यहर्निशम्।
प्लावयन्ति जगत्सर्वमम्भोभिर्मुनिसत्तम ॥ 38 ॥ 138

धाराभिरतिमात्राभिः प्लावयित्वाखिलं भुवम्।
भुवर्लोकं तथैवोर्ध्वं प्लावयन्ति हि ते द्विज ॥ 39 ॥ 139

अन्धकारीकृते लोके नष्टे स्थावरजङ्गमे।
वर्षन्ति ते महामेघा वर्षाणामधिकं शतम्॥ **40**॥ 140

एवं भवति कल्पान्ते समस्तं मुनिसत्तम।
वासुदेवस्य माहात्म्यान्नित्यस्य परमात्मनः॥ **41**॥ 141

॥ इति श्रीविष्णुपुराणे षष्ठेंऽशे तृतीयोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ षष्ठेंऽशे चतुर्थोऽध्यायः ॥

श्रीपराशर उवाच

सप्तर्षिस्थानमाक्रम्य स्थितेऽम्भसि महामुने।
एकार्णवं भवत्येतत्त्रैलोक्यमखिलं ततः॥ 1॥ 142

मुखनिःश्वासजो विष्णोर्वायुस्ताञ्जलदांस्ततः।
नाशयन्वाति मैत्रेय वर्षाणामपरं शतम्॥ 2॥ 143

सर्वभूतमयोऽचिन्त्यो भगवान्भूतभावनः।
अनादिरादिर्विश्वस्य पीत्वा वायुमशेषतः॥ 3॥ 144

एकार्णवे ततस्तस्मिञ्छेषशय्यागतः प्रभुः।
ब्रह्मरूपधरश्शेते भगवानादिकृद्धरिः॥ 4॥ 145

जनलोकगतैस्सिद्धैस्सनकाद्यैरभिष्टुतः।
ब्रह्मलोकगतैश्चैव चिन्त्यमानो मुमुक्षुभिः॥ 5॥ 146

आत्ममायामयीं दिव्यां योगनिद्रां समास्थितः।
आत्मानं वासुदेवाख्यं चिन्तयन्मधुसूदनः॥ 6॥ 147

एष नैमित्तिको नाम मैत्रेय प्रतिसञ्चरः।
निमित्तं तत्र यच्छेते ब्रह्मरूपधरो हरिः॥ 7॥ 148

यदा जागर्ति सर्वात्मा स तदा चेष्टते जगत्।
निमीलत्येतदखिलं मायाशय्यां गतेऽच्युते॥ 8॥ 149

पद्मयोनेर्दिनं यत्तु चतुर्युगसहस्रवत्।
एकार्णवीकृते लोके तावती रात्रिरिष्यते॥ 9॥ 150

ततः प्रबुद्धो रात्र्यन्ते पुनस्सृष्टिं करोत्यजः।
ब्रह्मस्वरूपधृग्विष्णुर्यथा ते कथितं पुरा॥ 10॥ 151

इत्येष कल्पसंहारोऽवान्तरप्रलयो द्विज।
नैमित्तिकस्ते कथितः प्राकृतं शृण्वतः परम्॥ 11॥ 152

अनावृष्ट्यादिसम्पर्कात्कृते संक्षालने मुने।
समस्तेष्वेव लोकेषु पातालेष्वखिलेषु च॥ 12॥ 153

महदादेर्विकारस्य विशेषान्तस्य संक्षये।
कृष्णेच्छाकारिते तस्मिन्प्रवृत्ते प्रतिसञ्चरे॥ 13॥ 154

आपो ग्रसन्ति वै पूर्वं भूमेर्गन्धात्मकं गुणम्।
आत्तगन्धा ततो भूमिः प्रलयत्वाय कल्पते॥ 14॥ 155

प्रणष्टे गन्धतन्मात्रे भवत्युर्वी जलात्मिका।
आपस्तदा प्रवृद्धास्तु वेगवत्यो महास्वनाः॥ 15॥ 156

सर्वमापूरयन्तीदं तिष्ठन्ति विचरन्ति च।
सलिलेनोर्मिमालेन लोका व्याप्ताः समन्ततः॥ 16॥ 157

अपामपि गुणो यस्तु ज्योतिषा पीयते तु सः।
नश्यन्त्यापस्ततस्ताश्च रसतन्मात्रसंक्षयात्॥ 17॥ 158

ततश्चापो हृतरसा ज्योतिषं प्राप्नुवन्ति वै।
अग्न्यवस्थे तु सलिले तेजसा सर्वतो वृते॥ 18॥ 159

स चाग्निः सर्वतो व्याप्य चादत्ते तज्जलं तथा।
सर्वमापूर्यतेऽर्चिर्भिस्तदा जगदिदं शनैः॥ 19॥ 160

अर्चिर्भिस्संवृते तस्मिंस्तिर्यगूर्ध्वमधस्तदा।
ज्योतिषोऽपि परं रूपं वायुरत्ति प्रभाकरम्॥ 20॥ 161

प्रलीने च ततस्तस्मिन्वायुभूतेऽखिलात्मनि।
प्रणष्टे रूपतन्मात्रे हृतरूपो विभावसुः॥ 21॥ 162

प्रशाम्यति तदा ज्योतिर्वायुर्दोधूयते महान्।
निरालोके तथा लोके वाय्ववस्थे च तेजसि॥ 22॥ 163

ततस्तु मूलमासाद्य वायुस्सम्भवमात्मनः।
ऊर्ध्वं चाधश्च तिर्यक्च दोधवीति दिशो दश॥ 23॥ 164

वायोरपि गुणं स्पर्शमाकाशो ग्रसते ततः।
प्रशाम्यति ततो वायुः खं तु तिष्ठत्यनावृतम्॥ 24॥ 165

अरूपरसमस्पर्शमगन्धं न च मूर्त्तिमत्।
सर्वमापूरयच्चैव सुमहत्तत्प्रकाशते॥ 25॥ 166

परिमण्डलं च सुषिरमाकाशं शब्दलक्षणम्।
शब्दमात्रं तदाकाशं सर्वमावृत्य तिष्ठति॥ 26॥ 167

ततश्शब्दगुणं तस्य भूतादिर्ग्रसते पुनः।
भूतेन्द्रियेषु युगपद्भूतादौ संस्थितेषु वै।
अभिमानात्मको ह्येष भूतादिस्तामसस्स्मृतः॥ 27॥ 168

भूतादिं ग्रसते चापि महान्वै बुद्धिलक्षणः॥ 28॥ 169

उर्वी महांश्च जगतः प्रान्तेऽन्तर्बाह्यतस्तथा॥ 29॥ 170

एवं सप्त महाबुद्धे क्रमात्प्रकृतयस्स्मृताः।
प्रत्याहारे तु तास्सर्वाः प्रविशन्ति परस्परम्॥ 30॥ 171

येनेदमावृतं सर्वमण्डमप्सु प्रलीयते।
सप्तद्वीपसमुद्रान्तं सप्तलोकं सपर्वतम्॥ 31॥ 172

उदकावरणं यत्तु ज्योतिषा पीयते तु तत्।
ज्योतिर्वायौ लयं याति यात्याकाशे समीरणः॥ 32॥ 173

आकाशं चैव भूतादिर्ग्रसते तं तथा महान्।
महान्तमेभिस्सहितं प्रकृतिर्ग्रसते द्विज॥ 33॥ 174

गुणसाम्यमनुद्रिक्तमन्यूनं च महामुने।
प्रोच्यते प्रकृतिर्हेतुः प्रधानं कारणं परम्॥ 34॥ 175

इत्येषा प्रकृतिस्सर्वा व्यक्ताव्यक्तस्वरूपिणी।
व्यक्तस्वरूपमव्यक्ते तस्मान्मैत्रेय लीयते॥ 35॥ 176

एकश्शुद्धोऽक्षरो नित्यस्सर्वव्यापी तथा पुमान्।
सोऽप्यंशस्सर्वभूतस्य मैत्रेय परमात्मनः॥ 36॥ 177

न सन्ति यत्र सर्वेशे नामजात्यादिकल्पनाः।
सत्तामात्रात्मके ज्ञेये ज्ञानात्मन्यात्मनः परे॥ 37॥ 178

तद्ब्रह्म परमं धाम परमात्मा स चेश्वरः।
स विष्णुस्सर्वमेवेदं यतो नावर्तते यतिः॥ 38॥ 179

प्रकृतिर्या मयाऽऽख्याता व्यक्ताव्यक्तस्वरूपिणी।
पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि॥ 39॥ 180

परमात्मा च सर्वेषामाधारः परमेश्वरः।
विष्णुनामा स वेदेषु वेदान्तेषु च गीयते॥ 40॥ 181

प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम्।
ताभ्यामुभाभ्यां पुरुषैस्सर्वमूर्त्तिस्स इज्यते॥ 41॥ 182

ऋग्यजुस्सामभिर्मार्गैः प्रवृत्तैरिज्यते ह्यसौ।
यज्ञेश्वरो यज्ञपुमान्पुरुषैः पुरुषोत्तमः॥ **42**॥ 183

ज्ञानात्मा ज्ञानयोगेन ज्ञानमूर्त्तिः स चेज्यते।
निवृत्ते योगिभिर्मार्गे विष्णुर्मुक्तिफलप्रदः॥ **43**॥ 184

ह्रस्वदीर्घप्लुतैर्यत्तु किञ्चिद्वस्त्वभिधीयते।
यच्च वाचामविषयं तत्सर्वं विष्णुरव्ययः॥ **44**॥ 185

व्यक्तस्स एव चाव्यक्तस्स एव पुरुषोऽव्ययः।
परमात्मा च विश्वात्मा विश्वरूपधरो हरिः॥ **45**॥ 186

व्यक्ताव्यक्तात्मिका तस्मिन्प्रकृतिस्सम्प्रलीयते।
पुरुषश्चापि मैत्रेय व्यापिन्यव्याहतात्मनि॥ **46**॥ 187

द्विपरार्द्धात्मकः कालः कथितो यो मया तव।
तदहस्तस्य मैत्रेय विष्णोरीशस्य कथ्यते॥ **47**॥ 188

व्यक्ते च प्रकृतौ लीने प्रकृत्यां पुरुषे तथा।
तत्र स्थिते निशा चास्य तत्प्रमाणा महामुने॥ **48**॥ 189

नैवाहस्तस्य न निशा नित्यस्य परमात्मनः।
उपचारस्तथाप्येष तस्येशस्य द्विजोच्यते॥ **49**॥ 190

इत्येष तव मैत्रेय कथितः प्राकृतो लयः।
आत्यन्तिकमथो ब्रह्मन्निबोध प्रतिसञ्चरम्॥ **50**॥ 191

॥ इति श्रीविष्णुपुराणे षष्ठेंऽशे चतुर्थोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ षष्ठेंऽशे पञ्चमोऽध्यायः ॥

श्रीपराशर उवाच

आध्यात्मिकादि मैत्रेय ज्ञात्वा तापत्रयं बुधः। 192
उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयम् ॥ 1 ॥

आध्यात्मिकोऽपि द्विविधश्शारीरो मानसस्तथा। 193
शारीरो बहुभिर्भेदैर्भिद्यते श्रूयतां च सः ॥ 2 ॥

शिरोरोगप्रतिश्यायज्वरशूलभगन्दरैः। 194
गुल्मार्शः श्वयथुश्वासच्छर्द्यादिभिरनेकधा ॥ 3 ॥

तथाक्षिरोगातीसारकुष्ठाङ्गामयसंज्ञितैः। 195
भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि ॥ 4 ॥

कामक्रोधभयद्वेषलोभमोहविषादजः। 196
शोकासूयावमानेर्ष्यामात्सर्यादिमयस्तथा ॥ 5 ॥

मानसोऽपि द्विजश्रेष्ठ तापो भवति नैकधा। 197
इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः ॥ 6 ॥

मृगपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः। 198
सरीसृपाद्यैश्च नृणां जायते चाधिभौतिकः ॥ 7 ॥

शीतवातोष्णवर्षाम्बुवैद्युतादिसमुद्भवः। 199
तापो द्विजवर श्रेष्ठैः कथ्यते चाधिदैविकः ॥ 8 ॥

गर्भजन्मजराज्ञानमृत्युनारकजं तथा।
दुःखं सहस्रशो भेदैर्भिद्यते मुनिसत्तम॥ 9॥ 200

सुकुमारतनुर्गर्भे जन्तुर्बहुमलावृते।
उल्बसंवेष्टितो भुग्नपृष्ठग्रीवास्थिसंहतिः॥ 10॥ 201

अत्यम्लकटुतीक्ष्णोष्णलवणैर्मातृभोजनैः।
अत्यन्तितापैरत्यर्थं वर्द्धमानातिवेदनः॥ 11॥ 202

प्रसारणाकुञ्चनादौ नाङ्गानां प्रभुरात्मनः।
शकृन्मूत्रमहापङ्कशायी सर्वत्र पीडितः॥ 12॥ 203

निरुच्छ्वासः सचैतन्यस्स्मरञ्जन्मशतान्यथ।
आस्ते गर्भेऽतिदुःखेन निजकर्मनिबन्धनः॥ 13॥ 204

जायमानः पुरीषासृङ्मूत्रशुक्राविलाननः।
प्राजापत्येन वातेन पीड्यमानास्थिबन्धनः॥ 14॥ 205

अधोमुखो वै क्रियते प्रबलैस्सूतिमारुतैः।
क्लेशान्निष्क्रान्तिमाप्नोति जठरान्मातुरातुरः॥ 15॥ 206

मूर्च्छामवाप्य महतीं संस्पृष्टो बाह्यवायुना।
विज्ञानभ्रंशमाप्नोति जातश्च मुनिसत्तम॥ 16॥ 207

कण्टकैरिव तुन्नाङ्गः क्रकचैरिव दारितः।
पूतिव्रणान्निपतितो धरण्यां कृमिको यथा॥ 17॥ 208

कण्डूयनेऽपि चाशक्तः परिवर्तेऽप्यनीश्वरः।
स्नानपानादिकाहारमप्याप्नोति परेच्छया॥ 18॥ 209

अशुचिप्रस्तरे सुप्तः कीटदंशादिभिस्तथा।
भक्ष्यमाणोऽपि नैवेषां समर्थो विनिवारणे॥ 19॥ 210

जन्मदुःखान्यनेकानि जन्मनोऽनन्तराणि च।
बालभावे यदाप्नोति ह्याधिभौतादिकानि च॥ **20**॥ 211

अज्ञानतमसाऽऽच्छन्नो मूढान्तःकरणो नरः।
न जानाति कुतः कोऽहं क्वाहं गन्ता किमात्मनः॥ **21**॥ 212

केन बन्धेन बद्धोऽहं कारणं किमकारणम्।
किं कार्यं किमकार्यं वा किं वाच्यं किं च नोच्यते॥ **22**॥ 213

को धर्मः कश्च वाधर्मः कस्मिन्वर्तेऽथ वा कथम्।
किं कर्तव्यमकर्तव्यं किं वा किं गुणदोषवत्॥ **23**॥ 214

एवं पशुसमैर्मूढैरज्ञानप्रभवं महत्।
अवाप्यते नरैर्दुःखं शिश्नोदरपरायणैः॥ **24**॥ 215

अज्ञानं तामसो भावः कार्यारम्भप्रवृत्तयः।
अज्ञानिनां प्रवर्तन्ते कर्मलोपास्ततो द्विज॥ **25**॥ 216

नरकं कर्मणां लोपात्फलमाहुर्मनीषिणः।
तस्मादज्ञानिनां दुःखमिह चामुत्र चोत्तमम्॥ **26**॥ 217

जराजर्जरदेहश्च शिथिलावयवः पुमान्।
विगलच्छीर्णदशनो वलिस्नायुशिरावृतः॥ **27**॥ 218

दूरप्रणष्टनयनो व्योमान्तर्गततारकः।
नासाविवरनिर्यातलोमपुञ्जश्चलद्वपुः॥ **28**॥ 219

प्रकटीभूतसर्वास्थिर्नतपृष्ठास्थिसंहतिः।
उत्सन्नजठराग्नित्वादल्पाहारोऽल्पचेष्टितः॥ **29**॥ 220

कृच्छ्राच्चङ्क्रमणोत्थानशयनासनचेष्टितः।
मन्दीभवच्छ्रोत्रनेत्रस्स्रवल्लालाविलाननः॥ **30**॥ 221

अनायत्तैस्समस्तैश्च करणैर्मरणोन्मुखः।
तत्क्षणेऽप्यनुभूतानामस्मर्ताखिलवस्तुनाम्॥ 31॥ 222

सकृदुच्चारिते वाक्ये समुद्भूतमहाश्रमः।
श्वासकाशसमुद्भूतमहायासप्रजागरः॥ 32॥ 223

अन्येनोत्थाप्यतेऽन्येन तथा संवेश्यते जरी।
भृत्यात्मपुत्रदाराणामवमानास्पदीकृतः॥ 33॥ 224

प्रक्षीणाखिलशौचश्च विहाराहारसस्पृहः।
हास्यः परिजनस्यापि निर्विण्णाशेषबान्धवः॥ 34॥ 225

अनुभूतमिवान्यस्मिञ्जन्मन्यात्मविचेष्टितम्।
संस्मरन्यौवने दीर्घं निःश्वसत्यभितापितः॥ 35॥ 226

एवमादीनि दुःखानि जरायामनुभूय वै।
मरणे यानि दुःखानि प्राप्नोति शृणु तान्यपि॥ 36॥ 227

श्लथद्ग्रीवाङ्घ्रिहस्तोऽथ व्याप्तो वेपथुना भृशम्।
मुहुर्ग्लानिपरवशो मुहुर्ज्ञानलवान्वितः॥ 37॥ 228

हिरण्यधान्यतनयभार्याभृत्यगृहादिषु।
एते कथं भविष्यन्तीत्यतीव ममताकुलः॥ 38॥ 229

मर्मभिर्द्भिर्महारोगैः क्रकचैरिव दारुणैः।
शरैरिवान्तकस्योग्रैश्छिद्यमानासुबन्धनः॥ 39॥ 230

परिवर्तिततताराक्षो हस्तपादं मुहुः क्षिपन्।
संशुष्यमाणताल्वोष्ठपुटो घुरघुरायते॥ 40॥ 231

निरुद्धकण्ठो दोषौघैरुदानश्वासपीडितः।
तापेन महता व्याप्तस्तृषा चार्त्तस्तथा क्षुधा॥ 41॥ 232

क्लेशादुत्क्रान्तिमाप्नोति यमकिङ्करपीडितः।
ततश्च यातनादेहं क्लेशेन प्रतिपद्यते॥ 42॥ 233

एतान्यन्यानि चोग्राणि दुःखानि मरणे नृणाम्।
शृणुष्व नरके यानि प्राप्यन्ते पुरुषैर्मृतैः॥ 43॥ 234

याम्यकिङ्करपाशादिग्रहणं दण्डताडनम्।
यमस्य दर्शनं चोग्रमुग्रमार्गविलोकनम्॥ 44॥ 235

करम्भवालुकावह्नियन्त्रशस्त्रादिभीषणे।
प्रत्येकं नरके याश्च यातना द्विज दुःसहाः॥ 45॥ 236

क्रकचैः पाट्यमानानां मूषायां चापि दह्यताम्।
कुठारैः कृत्यमानानां भूमौ चापि निखन्यताम्॥ 46॥ 237

शूलेष्वारोप्यमाणानां व्याघ्रवक्त्रे प्रवेश्यताम्।
गृध्रैस्सभ्भक्ष्यमाणानां द्वीपिभिश्चोपभुज्यताम्॥ 47॥ 238

क्वाथ्यतां तैलमध्ये च क्लिद्यतां क्षारकर्दमे।
उच्चान्निपात्यमानानां क्षिप्यतां क्षेपयन्त्रकैः॥ 48॥ 239

नरके यानि दुःखानि पापहेतूद्भवानि वै।
प्राप्यन्ते नारकैर्विप्र तेषां संख्या न विद्यते॥ 49॥ 240

न केवलं द्विजश्रेष्ठ नरके दुःखपद्धतिः।
स्वर्गेऽपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृतिः॥ 50॥ 241

पुनश्च गर्भे भवति जायते च पुनः पुनः।
गर्भे विलीयते भूयो जायमानोऽस्तमेति वै॥ 51॥ 242

जातमात्रश्च म्रियते बालभावेऽथ यौवने।
मध्यमं वा वयः प्राप्य वार्द्धके वाथ वा मृतिः॥ 52॥ 243

यावज्जीवति तावच्च दुःखैर्नानाविधैः प्लुतः।
तन्तुकारणपक्ष्मौघैरास्ते कार्पासबीजवत्॥ 53॥ 244

द्रव्यनाशे तथोत्पत्तौ पालने च सदा नृणाम्।
भवन्त्यनेकदुःखानि तथैवेष्टविपत्तिषु॥ 54॥ 245

यद्यत्प्रीतिकरं पुंसां वस्तु मैत्रेय जायते।
तदेव दुःखवृक्षस्य बीजत्वमुपगच्छति॥ 55॥ 246

कलत्रपुत्रमित्रार्थगृहक्षेत्रधनादिकैः।
क्रियते न तथा भूरि सुखं पुंसां यथाऽसुखम्॥ 56॥ 247

इति संसारदुःखार्कतापतापितचेतसाम्।
विमुक्तिपादपच्छायामृते कुत्र सुखं नृणाम्॥ 57॥ 248

तदस्य त्रिविधस्यापि दुःखजातस्य वै मम।
गर्भजन्मजराद्येषु स्थानेषु प्रभविष्यतः॥ 58॥ 249

निरस्तातिशयाह्लादसुखभावैकलक्षणा।
भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मता॥ 59॥ 250

तस्मात्तत्प्राप्तये यत्नः कर्तव्यः पण्डितैर्नरैः।
तत्प्राप्तिहेतुर्ज्ञानं च कर्म चोक्तं महामुने॥ 60॥ 251

आगमोत्थं विवेकाच्च द्विधा ज्ञानं तदुच्यते।
शब्दब्रह्मागममयं परं ब्रह्म विवेकजम्॥ 61॥ 252

अन्धं तम इवाज्ञानं दीपवच्चेन्द्रियोद्भवम्।
यथा सूर्यस्तथा ज्ञानं यद्विप्रर्षे विवेकजम्॥ 62॥ 253

मनुरप्याह वेदार्थं स्मृत्वा यन्मुनिसत्तम।
तदेतच्छूयतामत्र सम्बन्धे गदतो मम॥ 63॥ 254

द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥ 64॥ 255

द्वे वै विद्ये वेदितव्ये इति चाथर्वणी श्रुतिः।
परया त्वक्षरप्राप्तिर्ऋग्वेदादिमयापरा॥ 65॥ 256

यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम्।
अनिर्देश्यमरूपं च पाणिपादाद्यसंयुतम्॥ 66॥ 257

विभुं सर्वगतं नित्यं भूतयोनिरकारणम्।
व्याप्यव्याप्तं यतः सर्वं यद्वै पश्यन्ति सूरयः॥ 67॥ 258

तद्ब्रह्म तत्परं धाम तद्ध्येयं मोक्षकाङ्क्षिभिः।
श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम्॥ 68॥ 259

तदेव भगवद्वाच्यं स्वरूपं परमात्मनः।
वाचको भगवच्छब्दस्तस्याद्यस्याक्षयात्मनः॥ 69॥ 260

एवं निगदितार्थस्य तत्तत्त्वं तस्य तत्त्वतः।
ज्ञायते येन तज्ज्ञानं परमन्यत्त्रयीमयम्॥ 70॥ 261

अशब्दगोचरस्यापि तस्य वै ब्रह्मणो द्विज।
पूजायां भगवच्छब्दः क्रियते ह्युपचारतः॥ 71॥ 262

शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते।
मैत्रेय भगवच्छब्दस्सर्वकारणकारणे॥ 72॥ 263

सम्भर्तेति तथा भर्ता भकारोऽर्थद्वयान्वितः।
नेता गमयिता स्रष्टा गकारार्थस्तथा मुने॥ 73॥ 264

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसश्श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा॥ 74॥ 265

वसन्ति तत्र भूतानि भूतात्मन्यखिलात्मनि।
स च भूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः॥ **75**॥ 266

एवमेष महाञ्छब्दो मैत्रेय भगवानिति।
परमब्रह्मभूतस्य वासुदेवस्य नान्यगः॥ **76**॥ 267

तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः।
शब्दोऽयं नोपचारेण त्वन्यत्र ह्युपचारतः॥ **77**॥ 268

उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम्।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति॥ **78**॥ 269

ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः॥ **79**॥ 270

सर्वाणि तत्र भूतानि वसन्ति परमात्मनि।
भूतेषु च स सर्वात्मा वासुदेवस्ततः स्मृतः॥ **80**॥ 271

खाण्डिक्यजनकायाह पृष्टः केशिध्वजः पुरा।
नामव्याख्यामनन्तस्य वासुदेवस्य तत्त्वतः॥ **81**॥ 272

भूतेषु वसते सोऽन्तर्वसन्त्यत्र च तानि यत्।
धाता विधाता जगतां वासुदेवस्ततः प्रभुः॥ **82**॥ 273

स सर्वभूतप्रकृतिं विकारान्-
गुणादिदोषांश्च मुने व्यतीतः।
अतीतसर्वावरणोऽखिलात्मा
तेनास्तृतं यद्भुवनान्तराले॥ **83**॥ 274

समस्तकल्याणगुणात्मकोऽसौ
स्वशक्तिलेशावृतभूतवर्गः।

इच्छागृहीताभिमतोरुदेह -
स्संसाधिताशेषजगद्धितो यः ॥ **84** ॥ 275

तेजोबलैश्वर्यमहावबोध -
सुवीर्यशक्त्यादिगुणैकराशिः।
परः पराणां सकला न यत्र
क्लेशादयस्सन्ति परावरेशे ॥ **85** ॥ 276

स ईश्वरो व्यष्टिसमष्टिरूपो
व्यक्तस्वरूपोऽप्रकटस्वरूपः।
सर्वेश्वरस्सर्वदृक् सर्ववित्च
समस्तशक्तिः परमेश्वराख्यः ॥ **86** ॥ 277

संज्ञायते येन तदस्तदोषं
शुद्धं परं निर्मलमेकरूपम्।
संदृश्यते वाप्यवगम्यते वा
तज्ज्ञानमज्ञानमतोऽन्यदुक्तम् ॥ **87** ॥ 278

॥ इति श्रीविष्णुपुराणे षष्ठेंऽशे पञ्चमोऽध्यायः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ षष्ठेंऽशे षष्ठोऽध्यायः ॥

श्रीपराशर उवाच

स्वाध्यायसंयमाभ्यां स दृश्यते पुरुषोत्तमः।
तत्प्राप्तिकारणं ब्रह्म तदेतदिति पठ्यते ॥ 1 ॥ 279

स्वाध्यायाद्योगमासीत योगात्स्वाध्यायमावसेत्।
स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते ॥ 2 ॥ 280

तदीक्षणाय स्वाध्यायश्चक्षुर्योगस्तथा परम्।
न मांसचक्षुषा द्रष्टुं ब्रह्मभूतस्स शक्यते ॥ 3 ॥ 281

श्रीमैत्रेय उवाच

भगवंस्तमहं योगं ज्ञातुमिच्छामि तं वद।
ज्ञाते यत्राखिलाधारं पश्येयं परमेश्वरम् ॥ 4 ॥ 282

श्रीपराशर उवाच

यथा केशिध्वजः प्राह खाण्डिक्याय महात्मने।
जनकाय पुरा योगं तमहं कथयामि ते ॥ 5 ॥ 283

श्रीमैत्रेय उवाच

खाण्डिक्यः कोऽभवद्ब्रह्मन्को वा केशिध्वजः कृती।
कथं तयोश्च संवादो योगसम्बन्धवानभूत् ॥ 6 ॥ 284

श्रीपराशर उवाच

धर्मध्वजो वै जनकस्तस्य पुत्रोऽमितध्वजः।
कृतध्वजश्च नाम्नासीत्सदाध्यात्मरतिर्नृपः॥ 7॥ 285

कृतध्वजस्य पुत्रोऽभूत् ख्यातः केशिध्वजो नृपः।
पुत्रोऽमितध्वजस्यापि खाण्डिक्यजनकोऽभवत्॥ 8॥ 286

कर्ममार्गेण खाण्डिक्यः पृथिव्यामभवत्कृती।
केशिध्वजोऽप्यतीवासीदात्मविद्याविशारदः॥ 9॥ 287

तावुभावपि चैवास्तां विजिगीषू परस्परम्।
केशिध्वजेन खाण्डिक्यस्स्वराज्यादवरोपितः॥ 10॥ 288

पुरोधसा मन्त्रिभिश्च समवेतोऽल्पसाधनः।
राज्यान्निराकृतस्सोऽथ दुर्गारण्यचरोऽभवत्॥ 11॥ 289

इयाज सोऽपि सुबहून्यज्ञाञ्ज्ञानव्यपाश्रयः।
ब्रह्मविद्यामधिष्ठाय तर्त्तुं मृत्युमविद्यया॥ 12॥ 290

एकदा वर्तमानस्य यागे योगविदां वर।
धर्मधेनुं जघानोग्रश्शार्दूलो विजने वने॥ 13॥ 291

ततो राजा हतां श्रुत्वा धेनुं व्याघ्रेण चर्त्विजः।
प्रायश्चित्तं स पप्रच्छ किमत्रेति विधीयताम्॥ 14॥ 292

तेऽप्यूचुर्न वयं विद्मः कशेरुः पृच्छ्यतामिति।
कशेरुरपि तेनोक्तस्तथैव प्राह भार्गवम्॥ 15॥ 293

शुनकं पृच्छ राजेन्द्र नाहं वेद्मि स वेत्स्यति।
स गत्वा तमपृच्छच्च सोऽप्याह शृणु यन्मुने॥ 16॥ 294

न कशेरुर्न चैवाहं न चान्यः साम्प्रतं भुवि।
वेत्त्येक एव त्वच्छत्रुः खाण्डिक्यो यो जितस्त्वया॥ 17॥ 295

स चाह तं व्रजाम्येष प्रष्टुमात्मरिपुं मुने।
प्राप्त एव महायज्ञो यदि मां स हनिष्यति॥ 18॥ 296

प्रायश्चित्तमशेषेण स चेत्पृष्टो वदिष्यति।
ततश्चाविकलो यागो मुनिश्रेष्ठ भविष्यति॥ 19॥ 297

श्रीपराशर उवाच

इत्युक्त्वा रथमारुह्य कृष्णाजिनधरो नृपः।
वनं जगाम यत्रास्ते स खाण्डिक्यो महामतिः॥ 20॥ 298

तमापतन्तमालोक्य खाण्डिक्यो रिपुमात्मनः।
प्रोवाच क्रोधताम्राक्षस्समारोपितकार्मुकः॥ 21॥ 299

खाण्डिक्य उवाच

कृष्णाजिनं त्वं कवचमाबध्यास्मान्हनिष्यसि।
कृष्णाजिनधरे वेत्सि न मयि प्रहरिष्यति॥ 22॥ 300

मृगाणां वद पृष्ठेषु मूढ कृष्णाजिनं न किम्।
येषां मया त्वया चोग्राः प्रहिताश्शितसायकाः॥ 23॥ 301

स त्वामहं हनिष्यामि न मे जीवन्विमोक्ष्यसे।
आतताय्यसि दुर्बुद्धे मम राज्यहरो रिपुः॥ 24॥ 302

केशिध्वज उवाच

खाण्डिक्य संशयं प्रष्टुं भवन्तमहमागतः।
न त्वां हन्तुं विचार्यैतत्कोपं बाणं विमुञ्च वा॥ 25॥ 303

श्रीपराशर उवाच

ततस्स मन्त्रिभिस्सार्द्धमेकान्ते सपुरोहितः।
मन्त्रयामास खाण्डिक्यस्सर्वैरेव महामतिः॥ 26॥ 304

तमूचुर्मन्त्रिणो वध्यो रिपुरेष वशं गतः।
हतेऽस्मिन्पृथिवी सर्वा तव वश्या भविष्यति॥ 27॥ 305

खाण्डिक्यश्चाह तान्सर्वानेवमेतन्न संशयः।
हतेऽस्मिन्पृथिवी सर्वा मम वश्या भविष्यति॥ 28॥ 306

परलोकजयस्तस्य पृथिवी सकला मम।
न हन्मि चेल्लोकजयो मम तस्य वसुन्धरा॥ 29॥ 307

नाहं मन्ये लोकजयादधिका स्याद्वसुन्धरा।
परलोकजयोऽनन्तस्स्वल्पकालो महीजयः॥ 30॥ 308

तस्मान्नैनं हनिष्यामि यत्पृच्छति वदामि तत्॥ 31॥ 309

श्रीपराशर उवाच

ततस्तमभ्युपेत्याह खाण्डिक्यजनको रिपुम्।
प्रष्टव्यं यत्त्वया सर्वं तत्पृच्छस्व वदाम्यहम्॥ 32॥ 310

ततस्सर्वं यथावृत्तं धर्मधेनुवधं द्विज।
कथयित्वा स पप्रच्छ प्रायश्चित्तं हि तद्गतम्॥ 33॥ 311

स चाचष्ट यथान्यायं द्विज केशिध्वजाय तत्।
प्रायश्चित्तमशेषेण यद्वै तत्र विधीयते॥ 34॥ 312

विदितार्थस्स तेनैव ह्यनुज्ञातो महात्मना।
यागभूमिमुपागम्य चक्रे सर्वाः क्रियाः क्रमात्॥ 35॥ 313

क्रमेण विधिवद्यागं नीत्वा सोऽवभृथाप्लुतः।
कृतकृत्यस्ततो भूत्वा चिन्तयामास पार्थिवः॥ 36॥ 314

पूजिताश्च द्विजास्सर्वे सदस्या मानिता मया।
तथैवार्थिजनोऽप्यर्थैर्योजितोऽभिमतैर्मया॥ 37॥ 315

यथार्हमस्य लोकस्य मया सर्वं विचेष्टितम्।
अनिष्पन्नक्रियं चेतस्तथापि मम किं यथा॥ 38॥ 316

इत्थं सञ्चिन्तयन्नेव सस्मार स महीपतिः।
खाण्डिक्याय न दत्तेति मया वै गुरुदक्षिणा॥ 39॥ 317

स जगाम तदा भूयो रथमारुह्य पार्थिवः।
मैत्रेय दुर्गगहनं खाण्डिक्यो यत्र संस्थितः॥ 40॥ 318

खाण्डिक्योऽपि पुनर्दृष्ट्वा तमायान्तं धृतायुधम्।
तस्थौ हन्तुं कृतमतिस्तमाह स पुनर्नृपः॥ 41॥ 319

भो नाहं तेऽपराधाय प्राप्तः खाण्डिक्य मा क्रुधः।
गुरोर्निष्क्रयदानाय मामवेहि त्वमागतम्॥ 42॥ 320

निष्पादितो मया यागः सम्यक्त्वदुपदेशतः।
सोऽहं ते दातुमिच्छामि वृणीष्व गुरुदक्षिणाम्॥ 43॥ 321

श्रीपराशर उवाच

भूयस्स मन्त्रिभिस्सार्द्धं मन्त्रयामास पार्थिवः।
गुरुनिष्क्रयकामोऽयं किं मया प्रार्थ्यतामिति॥ 44॥ 322

तमूचुर्मन्त्रिणो राज्यमशेषं प्रार्थ्यतामयम्।
शत्रुभिः प्रार्थ्यते राज्यमनायासितसैनिकैः॥ 45॥ 323

प्रहस्य तानाह नृपस्स खाण्डिक्यो महामतिः।
स्वल्पकालं महीपाल्यं मादृशैः प्रार्थ्यते कथम्॥ 46॥ 324

एवमेतद्भवन्तोऽत्र ह्यर्थसाधनमन्त्रिणः।
परमार्थः कथं कोऽत्र यूयं नात्र विचक्षणाः॥ 47॥ 325

श्रीपराशर उवाच

इत्युक्त्वा समुपेत्यैनं स तु केशिध्वजं नृपः।
उवाच किमवश्यं त्वं ददासि गुरुदक्षिणाम्॥ **48**॥ 326

बाढमित्येव तेनोक्तः खाण्डिक्यस्तमथाब्रवीत्।
भवानध्यात्मविज्ञानपरमार्थविचक्षणः॥ **49**॥ 327

यदि चेद्दीयते मह्यं भवता गुरुनिष्क्रयः।
तत्क्लेशप्रशमायालं यत्कर्म तदुदीरय॥ **50**॥ 328

॥ इति श्रीविष्णुपुराणे षष्ठेंऽशे षष्ठोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ षष्ठेंऽशे सप्तमोऽध्यायः ॥

केशिध्वज उवाच

न प्रार्थितं त्वया कस्मादस्मद्राज्यमकण्टकम्।
राज्यलाभाद्विना नान्यत्क्षत्रियाणामतिप्रियम्॥ 1 ॥ 329

खाण्डिक्य उवाच

केशिध्वज निबोध त्वं मया न प्रार्थितं यतः।
राज्यमेतदशेषं ते यत्र गृध्नन्त्यपण्डिताः॥ 2 ॥ 330

क्षत्रियाणामयं धर्मो यत्प्रजापरिपालनम्।
वधश्च धर्मयुद्धेन स्वराज्यपरिपन्थिनाम्॥ 3 ॥ 331

तत्राशक्तस्य मे दोषो नैवास्त्यपहृते त्वया।
बन्धायैव भवत्येषा ह्यविद्याप्यक्रमोज्झिता॥ 4 ॥ 332

जन्मोपभोगलिप्सार्थमियं राज्यस्पृहा मम।
अन्येषां दोषजा सैव धर्मं वै नानुरुध्यते॥ 5 ॥ 333

न याच्ञा क्षत्रबन्धूनां धर्मायैतत्सतां मतम्।
अतो न याचितं राज्यमविद्यान्तर्गतं तव॥ 6 ॥ 334

राज्ये गृध्नन्त्यविद्वांसो ममत्वाहृतचेतसः।
अहंमानमहापानमदमत्ता न मादृशाः॥ 7 ॥ 335

श्रीपराशर उवाच

प्रहृष्टस्साध्विति प्राह ततः केशिध्वजो नृपः।
खाण्डिक्यजनकं प्रीत्या श्रूयतां वचनं मम॥ 8॥ 336

अहं ह्यविद्यया मृत्युं तर्तुकामः करोमि वै।
राज्यं यागांश्च विविधान्भोगैः पुण्यक्षयं तथा॥ 9॥ 337

तदिदं ते मनो दिष्ट्या विवेकैश्वर्यतां गतम्।
तच्छ्रयतामविद्यायास्स्वरूपं कुलनन्दन॥ 10॥ 338

अनात्मन्यात्मबुद्धिर्या चास्वे स्वमिति या मतिः।
संसारतरुसम्भूतिबीजमेतद्द्विधा स्थितम्॥ 11॥ 339

पञ्चभूतात्मके देहे देही मोहतमोवृतः।
अहं ममैतदित्युच्चैः कुरुते कुमतिर्मतिम्॥ 12॥ 340

आकाशवाय्वग्निजलपृथिवीभ्यः पृथक् स्थिते।
आत्मन्यात्ममयं भावं कः करोति कलेवरे॥ 13॥ 341

कलेवरोपभोग्यं हि गृहक्षेत्रादिकं च कः।
अदेहे ह्यात्मनि प्राज्ञो ममेदमिति मन्यते॥ 14॥ 342

इत्थं च पुत्रपौत्रेषु तद्देहोत्पादितेषु कः।
करोति पण्डितस्स्वाम्यमनात्मनि कलेवरे॥ 15॥ 343

सर्वं देहोपभोगाय कुरुते कर्म मानवः।
देहश्चान्यो यदा पुंसस्तदा बन्धाय तत्परम्॥ 16॥ 344

मृण्मयं हि यथा गेहं लिप्यते वै मृदम्भसा।
पार्थिवोऽयं तथा देहो मृदम्ब्वालेपनस्थितः॥ 17॥ 345

पञ्चभूतात्मकैर्भोगैः पञ्चभूतात्मकं वपुः।
आप्यायते यदि ततः पुंसो भोगोऽत्र किं कृतः॥ 18॥ 346

अनेकजन्मसाहस्त्रीं संसारपदवीं व्रजन्।
मोहश्रमं प्रयातोऽसौ वासनारेणुकुण्ठितः॥ 19॥ 347

प्रक्षाल्यते यदा सोऽस्य रेणुर्ज्ञानोष्णवारिणा।
तदा संसारपान्थस्य याति मोहश्रमश्शमम्॥ 20॥ 348

मोहश्रमे शमं याते स्वस्थान्तःकरणः पुमान्।
अनन्यातिशयाबाधं परं निर्वाणमृच्छति॥ 21॥ 349

निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः।
दुःखाज्ञानमया धर्माः प्रकृतेस्ते तु नात्मनः॥ 22॥ 350

जलस्य नाग्निसंसर्गः स्थालीसंगात्तथापि हि।
शब्दोद्रेकादिकान्धर्मांस्तत्करोति यथा नृप॥ 23॥ 351

तथात्मा प्रकृतेस्सङ्गादहम्मानादिदूषितः।
भजते प्राकृतान्धर्मानन्यस्तेभ्यो हि सोऽव्ययः॥ 24॥ 352

तदेतत्कथितं बीजमविद्याया मया तव।
क्लेशानां च क्षयकरं योगादन्यन्न विद्यते॥ 25॥ 353

खाण्डिक्य उवाच

तं तु ब्रूहि महाभाग योगं योगविदुत्तम।
विज्ञातयोगशास्त्रार्थस्त्वमस्यां निमिसन्ततौ॥ 26॥ 354

केशिध्वज उवाच

योगस्वरूपं खाण्डिक्य श्रूयतां गदतो मम।
यत्र स्थितो न च्यवते प्राप्य ब्रह्मलयं मुनिः॥ 27॥ 355

मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धाय विषयासङ्ग मुक्त्यै निर्विषयं मनः॥ 28॥ 356

विषयेभ्यस्समाहृत्य विज्ञानात्मा मनो मुनिः।
चिन्तयेन्मुक्तये तेन ब्रह्मभूतं परेश्वरम्॥ 29॥ 357

आत्मभावं नयत्येनं तद्ब्रह्म ध्यायिनं मुनिम्।
विकार्यमात्मनश्शक्त्या लोहमाकर्षको यथा॥ 30॥ 358

आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः।
तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते॥ 31॥ 359

एवमत्यन्तवैशिष्ट्ययुक्तधर्मोपलक्षणः।
यस्य योगस्स वै योगी मुमुक्षुरभिधीयते॥ 32॥ 360

योगयुक् प्रथमं योगी युञ्जानो ह्यभिधीयते।
विनिष्पन्नसमाधिस्तु परं ब्रह्मोपलब्धिमान्॥ 33॥ 361

यद्यन्तरायदोषेण दूष्यते चास्य मानसम्।
जन्मान्तरैरभ्यसतो मुक्तिः पूर्वस्य जायते॥ 34॥ 362

विनिष्पन्नसमाधिस्तु मुक्तिं तत्रैव जन्मनि।
प्राप्नोति योगी योगाग्निदग्धकर्मचयोऽचिरात्॥ 35॥ 363

ब्रह्मचर्यमहिंसां च सत्यास्तेयापरिग्रहान्।
सेवेत योगी निष्कामो योग्यतां स्वमनो नयन्॥ 36॥ 364

स्वाध्यायशौचसन्तोषतपांसि नियतात्मवान्।
कुर्वीत ब्रह्मणि तथा परस्मिन्प्रवणं मनः॥ 37॥ 365

एते यमास्सनियमाः पञ्च पञ्च च कीर्तिताः।
विशिष्टफलदाः काम्या निष्कामाणां विमुक्तिदाः॥ 38॥ 366

एकं भद्रासनादीनां समास्थाय गुणैर्युतः।
यमाख्यैर्नियमाख्यैश्च युञ्जीत नियतो यतिः॥ 39॥ 367

प्राणाख्यमनिलं वश्यमभ्यासात्कुरुते तु यत्।
प्राणायामस्स विज्ञेयस्सबीजोऽबीज एव च॥ 40॥ 368

परस्परेणाभिभवं प्राणापानौ यथानिलौ।
कुरुतस्सद्विधानेन तृतीयस्संयमात्तयोः॥ 41॥ 369

तस्य चालम्बनवतः स्थूलरूपं द्विजोत्तम।
आलम्बनमनन्तस्य योगिनोऽभ्यसतः स्मृतम्॥ 42॥ 370

शब्दादिष्वनुरक्तानि निगृह्याक्षाणि योगवित्।
कुर्याच्चित्तानुकारीणि प्रत्याहारपरायणः॥ 43॥ 371

वश्यता परमा तेन जायतेऽतिचलात्मनाम्।
इन्द्रियाणामवश्यैस्तैर्न योगी योगसाधकः॥ 44॥ 372

प्राणायामेन पवने प्रत्याहारेण चेन्द्रिये।
वशीकृते ततः कुर्यात्स्थितं चेतश्शुभाश्रये॥ 45॥ 373

खाण्डिक्य उवाच

कथ्यतां मे महाभाग चेतसो यश्शुभाश्रयः।
यदाधारमशेषं तद्धन्ति दोषमलोद्भवम्॥ 46॥ 374

केशिध्वज उवाच

आश्रयश्चेतसो ब्रह्म द्विधा तच्च स्वभावतः।
भूप मूर्त्तममूर्त्तं च परं चापरमेव च॥ 47॥ 375

त्रिविधा भावना भूप विश्वमेतन्निबोधताम्।
ब्रह्माख्या कर्मसंज्ञा च तथा चैवोभयात्मिका॥ 48॥ 376

कर्मभावात्मिका ह्येका ब्रह्मभावात्मिका परा।
उभयात्मिका तथैवान्या त्रिविधा भावभावना॥ 49॥ 377

सनन्दनादयो ये तु ब्रह्मभावनया युताः।
कर्मभावनया चान्ये देवाद्याः स्थावराश्चराः॥ **50**॥ 378

हिरण्यगर्भादिषु च ब्रह्मकर्मात्मिका द्विधा।
बोधाधिकारयुक्तेषु विद्यते भावभावना॥ **51**॥ 379

अक्षीणेषु समस्तेषु विशेषज्ञानकर्मसु।
विश्वमेतत्परं चान्यद्भेदभिन्नदृशां नृणाम्॥ **52**॥ 380

प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम्।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम्॥ **53**॥ 381

तच्च विष्णोः परं रूपमरूपाख्यमनुत्तमम्।
विश्वस्वरूपवैरूप्यलक्षणं परमात्मनः॥ **54**॥ 382

न तद्योगयुजा शक्यं नृप चिन्तयितुं यतः।
ततः स्थूलं हरे रूपं चिन्तयेद्विश्वगोचरम्॥ **55**॥ 383

हिरण्यगर्भो भगवान्वासुदेवः प्रजापतिः।
मरुतो वसवो रुद्रा भास्करास्तारका ग्रहाः॥ **56**॥ 384

गन्धर्वयक्षदैत्याद्यास्सकला देवयोनयः।
मनुष्याः पशवश्शैलास्समुद्रास्सरितो द्रुमाः॥ **57**॥ 385

भूप भूतान्यशेषाणि भूतानां ये च हेतवः।
प्रधानादिविशेषान्तं चेतनाचेतनात्मकम्॥ **58**॥ 386

एकपादं द्विपादं च बहुपादमपादकम्।
मूर्त्तमेतद्धरे रूपं भावनात्रितयात्मकम्॥ **59**॥ 387

एतत्सर्वमिदं विश्वं जगदेतच्चराचरम्।
परब्रह्मस्वरूपस्य विष्णोश्शक्तिसमन्वितम्॥ **60**॥ 388

विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथाऽपरा।
अविद्या कर्मसंज्ञान्या तृतीया शक्तिरिष्यते॥ **61**॥ 389

यया क्षेत्रज्ञशक्तिस्सा वेष्टिता नृप सर्वगा।
संसारतापानखिलानवाप्नोत्यतिसन्ततान्॥ **62**॥ 390

तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता।
सर्वभूतेषु भूपाल तारतम्येन लक्ष्यते॥ **63**॥ 391

अप्राणवत्सु स्वल्पा सा स्थावरेषु ततोऽधिका।
सरीसृपेषु तेभ्योऽपि ह्यतिशक्त्या पतत्रिषु॥ **64**॥ 392

पतत्रिभ्यो मृगास्तेभ्यस्तच्छक्त्या पशवोऽधिकाः।
पशुभ्यो मनुजाश्चातिशक्त्या पुंसः प्रभाविताः॥ **65**॥ 393

तेभ्योऽपि नागगन्धर्वयक्षाद्या देवता नृप॥ **66**॥ 394

शक्रस्समस्तदेवेभ्यस्ततश्चाति प्रजापतिः।
हिरण्यगर्भोऽपि ततः पुंसः शक्त्युपलक्षितः॥ **67**॥ 395

एतान्यशेषरूपाणि तस्य रूपाणि पार्थिव।
यतस्तच्छक्तियोगेन युक्तानि नभसा यथा॥ **68**॥ 396

द्वितीयं विष्णुसंज्ञस्य योगिध्येयं महामते।
अमूर्त्तं ब्रह्मणो रूपं यत्सदित्युच्यते बुधैः॥ **69**॥ 397

समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः।
तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत्॥ **70**॥ 398

समस्तशक्तिरूपाणि तत्करोति जनेश्वर।
देवतिर्यङ्मनुष्यादिचेष्टावन्ति स्वलीलया॥ **71**॥ 399

जगतामुपकाराय न सा कर्मनिमित्तजा।
चेष्टा तस्याप्रमेयस्य व्यापिन्यव्याहतात्मिका॥ 72॥ 400

तद्रूपं विश्वरूपस्य तस्य योगयुजा नृप।
चिन्त्यमात्मविशुद्ध्यर्थं सर्वकिल्बिषनाशनम्॥ 73॥ 401

यथाग्निरुद्धतशिखः कक्षं दहति सानिलः।
तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिषम्॥ 74॥ 402

तस्मात्समस्तशक्तीनामाधारे तत्र चेतसः।
कुर्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणा॥ 75॥ 403

शुभाश्रयः स चित्तस्य सर्वगस्याचलात्मनः।
त्रिभावभावनातीतो मुक्तये योगिनो नृप॥ 76॥ 404

अन्ये तु पुरुषव्याघ्र चेतसो ये व्यपाश्रयाः।
अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनयः॥ 77॥ 405

मूर्त्तं भगवतो रूपं सर्वापाश्रयनिःस्पृहम्।
एषा वै धारणा प्रोक्ता यच्चित्तं तत्र धार्यते॥ 78॥ 406

यच्च मूर्त्तं हरे रूपं यादृक्चिन्त्यं नराधिप।
तच्छूयतामनाधारा धारणा नोपपद्यते॥ 79॥ 407

प्रसन्नवदनं चारुपद्मपत्रोपमेक्षणम्।
सुकपोलं सुविस्तीर्णललाटफलकोज्ज्वलम्॥ 80॥ 408

समकर्णान्तविन्यस्तचारुकुण्डलभूषणम्।
कम्बुग्रीवं सुविस्तीर्णश्रीवत्साङ्कितवक्षसम्॥ 81॥ 409

वलित्रिभङ्गिना मग्ननाभिना ह्युदरेण च।
प्रलम्बाष्टभुजं विष्णुमथवापि चतुर्भुजम्॥ 82॥ 410

समस्थितोरुजङ्घं च सुस्थिताङ्घ्रिवराम्बुजम्।
चिन्तयेद्ब्रह्मभूतं तं पीतनिर्मलवाससम्॥ **83**॥ 411

किरीटहारकेयूरकटकादिविभूषितम्॥ **84**॥ 412

शार्ङ्गशङ्खगदाखङ्गचक्राक्षवलयान्वितम्।
वरदाभयहस्तं च मुद्रिकारत्नभूषितम्॥ **85**॥ 413

चिन्तयेत्तन्मयो योगी समाधायात्ममानसम्।
तावद्यावद्दृढीभूता तत्रैव नृप धारणा॥ **86**॥ 414

व्रजतस्तिष्ठतोऽन्यद्वा स्वेच्छया कर्म कुर्वतः।
नापयाति यदा चित्तात्सिद्धां मन्येत तां तदा॥ **87**॥ 415

ततः शङ्खगदाचक्रशार्ङ्गादिरहितं बुधः।
चिन्तयेद्भगवद्रूपं प्रशान्तं साक्षसूत्रकम्॥ **88**॥ 416

सा यदा धारणा तद्वदवस्थानवती ततः।
किरीटकेयूरमुखैर्भूषणै रहितं स्मरेत्॥ **89**॥ 417

तदेकावयवं देवं चेतसा हि पुनर्बुधः।
कुर्यात्ततोऽवयविनि प्रणिधानपरो भवेत्॥ **90**॥ 418

तद्रूपप्रत्यया चैका सन्ततिश्चान्यनिःस्पृहा।
तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप॥ **91**॥ 419

तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत्।
मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते॥ **92**॥ 420

विज्ञानं प्रापकं प्राप्ये परे ब्रह्मणि पार्थिव।
प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभावनः॥ **93**॥ 421

क्षेत्रज्ञः करणी ज्ञानं करणं तस्य तेन तत्।
निष्पाद्य मुक्तिकार्यं वै कृतकृत्यो निवर्तते॥ **94**॥ 422

तद्भावभावमापन्नस्ततोऽसौ परमात्मना।
भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत्॥ **95**॥ 423

विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति॥ **96**॥ 424

इत्युक्तस्ते मया योगः खाण्डिक्य परिपृच्छतः।
संक्षेपविस्ताराभ्यां तु किमन्यत्क्रियतां तव॥ **97**॥ 425

खाण्डिक्य उवाच

कथिते योगसद्भावे सर्वमेव कृतं मम।
तवोपदेशेनाशेषो नष्टश्चित्तमलो यतः॥ **98**॥ 426

ममेति यन्मया चोक्तमसदेतन्न चान्यथा।
नरेन्द्र गदितुं शक्यमपि विज्ञेयवेदिभिः॥ **99**॥ 427

अहं ममेत्यविद्येयं व्यवहारस्तथानयोः।
परमार्थस्त्वसंलापो गोचरे वचसां न यः॥ **100**॥ 428

तद्गच्छ श्रेयसे सर्वं ममैतद्भवता कृतम्।
यद्विमुक्तिप्रदो योगः प्रोक्तः केशिध्वजाव्ययः॥ **101**॥ 429

श्रीपराशर उवाच

यथार्हं पूजया तेन खाण्डिक्येन स पूजितः।
आजगाम पुरं ब्रह्मंस्ततः केशिध्वजो नृपः॥ **102**॥ 430

खाण्डिक्योऽपि सुतं कृत्वा राजानं योगसिद्धये।
वनं जगाम गोविन्दे विनिवेशितमानसः॥ **103**॥ 431

तत्रैकान्तमतिर्भूत्वा यमादिगुणसंयुतः।
विष्ण्वाख्ये निर्मले ब्रह्मण्यवाप नृपतिर्लयम्॥ **104**॥ 432

केशिध्वजो विमुक्त्यर्थं स्वकर्मक्षपणोन्मुखः।
बुभुजे विषयान्कर्म चक्रे चानभिसंहितम्॥ **105**॥ 433

सकल्याणोपभोगैश्च क्षीणपापोऽमलस्तथा।
अवाप सिद्धिमत्यन्तां तापक्षयफलां द्विज॥ **106**॥ 434

॥ इति श्रीविष्णुपुराणे षष्ठेंऽशे सप्तमोऽध्यायः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ षष्ठेंऽशे अष्टमोऽध्यायः ॥

श्रीपराशर उवाच

इत्येष कथितः सम्यक् तृतीयः प्रतिसञ्चरः।
आत्यन्तिको विमुक्तिर्या लयो ब्रह्मणि शाश्वते ॥ 1 ॥ 435

सर्गश्च प्रतिसर्गश्च वंशमन्वन्तराणि च।
वंशानुचरितं चैव भवतो गदितं मया ॥ 2 ॥ 436

पुराणं वैष्णवं चैतत्सर्वकिल्बिषनाशनम्।
विशिष्टं सर्वशास्त्रेभ्यः पुरुषार्थोपपादकम् ॥ 3 ॥ 437

तुभ्यं यथावन्मैत्रेय प्रोक्तं शुश्रूषवेऽव्ययम्।
यदन्यदपि वक्तव्यं तत्पृच्छाद्य वदामि ते ॥ 4 ॥ 438

श्रीमैत्रेय उवाच

भगवन्कथितं सर्वं यत्पृष्टोऽसि मया मुने।
श्रुतं चैतन्मया भक्त्या नान्यत्प्रष्टव्यमस्ति मे ॥ 5 ॥ 439

विच्छिन्नाः सर्वसन्देहा वैमल्यं मनसः कृतम्।
त्वत्प्रसादान्मया ज्ञाता उत्पत्तिस्थितिसंक्षयाः ॥ 6 ॥ 440

ज्ञातश्चतुर्विधो राशिः शक्तिश्च त्रिविधा गुरो।
विज्ञाता सा च कात्स्न्र्येन त्रिविधा भावभावना ॥ 7 ॥ 441

त्वत्प्रसादान्मया ज्ञातं ज्ञेयमन्यैरलं द्विज।
यदेतदखिलं विष्णोर्जगन्न व्यतिरिच्यते॥ 8॥ 442

कृतार्थोऽहमसन्देहस्त्वत्प्रसादान्महामुने।
वर्णधर्मादयो धर्मा विदिता यदशेषतः॥ 9॥ 443

प्रवृत्तं च निवृत्तं च ज्ञातं कर्म मयाखिलम्।
प्रसीद विप्रप्रवर नान्यत्प्रष्टव्यमस्ति मे॥ 10॥ 444

यदस्य कथनायासैर्योजितोऽसि मया गुरो।
तत्क्षम्यतां विशेषोऽस्ति न सतां पुत्रशिष्ययोः॥ 11॥ 445

श्रीपराशर उवाच

एतत्ते यन्मयाख्यातं पुराणं वेदसम्मतम्।
श्रुतेऽस्मिन्सर्वदोषोत्थः पापराशिः प्रणश्यति॥ 12॥ 446

सर्गश्च प्रतिसर्गश्च वंशमन्वन्तराणि च।
वंशानुचरितं कृत्स्नं मयात्र तव कीर्तितम्॥ 13॥ 447

अत्र देवास्तथा दैत्या गन्धर्वोरगराक्षसाः।
यक्षविद्याधरास्सिद्धाः कथ्यन्तेऽप्सरसस्तथा॥ 14॥ 448

मुनयो भावितात्मानः कथ्यन्ते तपसान्विताः।
चातुर्वर्ण्य तथा पुंसां विशिष्टचरितानि च॥ 15॥ 449

पुण्याः प्रदेशा मेदिन्याः पुण्या नद्योऽथ सागराः।
पर्वताश्च महापुण्याश्चरितानि च धीमताम्॥ 16॥ 450

वर्णधर्मादयो धर्मा वेदशास्त्राणि कृत्स्नशः।
येषां संस्मरणात्सद्यः सर्वपापैः प्रमुच्यते॥ 17॥ 451

उत्पत्तिस्थितिनाशानां हेतुर्यो जगतोऽव्ययः।
स सर्वभूतस्सर्वात्मा कथ्यते भगवान्हरिः॥ 18॥ 452

अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः।
पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्वृकैरिव॥ 19॥ 453

यन्नामकीर्तनं भक्त्या विलायनमनुत्तमम्।
मैत्रेयाशेषपापानां धातूनामिव पावकः॥ 20॥ 454

कलिकल्मषमत्युग्रं नरकार्तिप्रदं नृणाम्।
प्रयाति विलयं सद्यः सकृद्यत्र च संस्मृते॥ 21॥ 455

हिरण्यगर्भदेवेन्द्ररुद्रादित्याश्विवायुभिः।
पावकैर्वसुभिः साध्यैर्विश्वेदेवादिभिः सुरैः॥ 22॥ 456

यक्षरक्षोरगैः सिद्धैर्दैत्यगन्धर्वदानवैः।
अप्सरोभिस्तथा तारानक्षत्रैः सकलैर्ग्रहैः॥ 23॥ 457

सप्तर्षिभिस्तथा धिष्ण्यैर्धिष्ण्याधिपतिभिस्तथा।
ब्राह्मणाद्यैर्मनुष्यैश्च तथैव पशुभिर्मृगैः॥ 24॥ 458

सरीसृपैर्विहङ्गैश्च पलाशाद्यैर्महीरुहैः।
वनाग्निसागरसरित्पातालैः सधरादिभिः॥ 25॥ 459

शब्दादिभिश्च सहितं ब्रह्माण्डमखिलं द्विज।
मेरोरिवाणुर्यस्यैतद्यन्मयं च द्विजोत्तम॥ 26॥ 460

स सर्वः सर्ववित्सर्वस्वरूपो रूपवर्जितः।
भगवान्कीर्तितो विष्णुरत्र पापप्रणाशनः॥ 27॥ 461

यदश्वमेधावभृथे स्नातः प्राप्नोति वै फलम्।
मानवस्तदवाप्नोति श्रुत्वैतन्मुनिसत्तम॥ 28॥ 462

प्रयागे पुष्करे चैव कुरुक्षेत्रे तथार्णवे।
कृतोपवासः प्राप्नोति तदस्य श्रवणान्नरः॥ 29॥ 463

यदग्निहोत्रे सुहुते वर्षेणाप्नोति मानवः।
महापुण्यफलं विप्र तदस्य श्रवणात्सकृत्॥ 30॥ 464

यज्ज्येष्ठशुक्ल द्वादश्यां स्नात्वा वै यमुनाजले।
मथुरायां हरिं दृष्ट्वा प्राप्नोति पुरुषः फलम्॥ 31॥ 465

तदाप्नोत्यखिलं सम्यगध्यायं यः शृणोति वै।
पुराणस्यास्य विप्रर्षे केशवार्पितमानसः॥ 32॥ 466

यमुनासलिलस्नातः पुरुषो मुनिसत्तम।
ज्येष्ठामूले सिते पक्षे द्वादश्यां समुपोषितः॥ 33॥ 467

समभ्यर्च्याच्युतं सम्यङ् मथुरायां समाहितः।
अश्वमेधस्य यज्ञस्य प्राप्नोत्यविकलं फलम्॥ 34॥ 468

आलोक्यर्द्धिमथान्येषामुन्नीतानां स्ववंशजैः।
एतत्किलोचुरन्येषां पितरः सपितामहाः॥ 35॥ 469

कच्चिदस्मत्कुले जातः कालिन्दीसलिलाप्लुतः।
अर्चयिष्यति गोविन्दं मथुरायामुपोषितः॥ 36॥ 470

ज्येष्ठामूले सिते पक्षे येनैवं वयमप्युत।
परामृद्धिमवाप्स्यामस्तारिताः स्वकुलोद्भवैः॥ 37॥ 471

ज्येष्ठामूले सिते पक्षे समभ्यर्च्य जनार्दनम्।
धन्यानां कुलजः पिण्डान्यमुनायां प्रदास्यति॥ 38॥ 472

तस्मिन्काले समभ्यर्च्य तत्र कृष्णं समाहितः।
दत्त्वा पिण्डं पितृभ्यश्च यमुनासलिलाप्लुतः॥ 39॥ 473

यदाप्नोति नरः पुण्यं तारयन्स्वपितामहान्।
श्रुत्वाध्यायं तदाप्नोति पुराणस्यास्य भक्तितः॥ **40**॥ 474

एतत्संसारभीरूणां परित्राणमनुत्तमम्।
श्राव्याणां परमं श्राव्यं पवित्राणामनुत्तमम्॥ **41**॥ 475

दुःस्वप्ननाशनं नृणां सर्वदुष्टनिबर्हणम्।
मङ्गलं मङ्गलानां च पुत्रसम्पत्प्रदायकम्॥ **42**॥ 476

इदमार्षं पुरा प्राह ऋभवे कमलोद्भवः।
ऋभुः प्रियव्रतायाह स च भागुरयेऽब्रवीत्॥ **43**॥ 477

भागुरिः स्तभ्भमित्राय दधीचाय स चोक्तवान्।
सारस्वताय तेनोक्तं भृगुस्सारस्वतेन च॥ **44**॥ 478

भृगुणा पुरुकुत्साय नर्मदायै स चोक्तवान्।
नर्मदा धृतराष्ट्राय नागायापूरणाय * च॥ **45**॥ 479

ताभ्यां च नागराजाय प्रोक्तं वासुकये द्विज।
वासुकिः प्राह वत्साय वत्सश्चाश्वतराय वै॥ **46**॥ 480

कम्बलाय च तेनोक्तमेलापुत्राय तेन वै॥ **47**॥ 481

पातालं समनुप्राप्तस्ततो वेदशिरा मुनिः।
प्राप्तवानेतदखिलं स च प्रमतये ददौ॥ **48**॥ 482

दत्तं प्रमतिना चैतज्जातुकर्णाय धीमते।
जातुकर्णेन चैवोक्तमन्येषां पुण्यकर्मणाम्॥ **49**॥ 483

पुलस्त्यवरदानेन ममाप्येतत्स्मृतिं गतम्।
मयापि तुभ्यं मैत्रेय यथावत्कथितं त्विदम्॥ **50**॥ 484

त्वमप्येतच्छिनीकाय कलेरन्ते वदिष्यसि ॥ 51 ॥ 485

इत्येतत्परमं गुह्यं
कलिकल्मषनाशनम्।
यः शृणोति नरो भक्त्या
सर्वपापैः प्रमुच्यते ॥ 52 ॥ 486

समस्ततीर्थस्नानानि समस्तामरसंस्तुतिः।
कृता तेन भवेदेतद्यः शृणोति दिने दिने ॥ 53 ॥ 487

कपिलादानजनितं पुण्यमत्यन्तदुर्लभम्।
श्रुत्वैतस्य दशाध्यायानवाप्नोति न संशयः ॥ 54 ॥ 488

यस्त्वेतत्सकलं शृणोति पुरुषः कृत्वा मनस्यच्युतं
सर्वं सर्वमयं समस्तजगतामाधारमात्माश्रयम्।
ज्ञानज्ञेयमनादिमन्तरहितं सर्वामराणां हितं
स प्राप्नोति न संशयोऽस्त्यविकलं यद्वाजिमेधे फलम् ॥ 55 ॥ 489

यत्रादौ भगवांश्चराचरगुरुर्मध्ये तथान्ते च सः
ब्रह्मज्ञानमयोऽच्युतोऽखिलजगन्मध्यान्तसर्गप्रभुः।
तत्सर्वं पुरुषः पवित्रममलं शृण्वन्पठन्वाचयन्
प्राप्नोत्यस्ति न तत्फलं त्रिभुवनेष्वेकान्तसिद्धिर्हरिः ॥ 56 ॥ 490

यस्मिन्न्यस्तमतिर्न याति नरकं स्वर्गोऽपि यच्चिन्तने
विघ्नो यत्र निवेशितात्ममनसो ब्राह्मोऽपि लोकोऽल्पकः।
मुक्तिं चेतसि यः स्थितोऽमलधियां पुंसां ददात्यव्ययः
किं चित्रं यदघं प्रयाति विलयं तत्राच्युते कीर्तिते ॥ 57 ॥ 491

यज्ञैर्यज्ञविदो यजन्ति सततं यज्ञेश्वरं कर्मिणो
यं वै ब्रह्ममयं परावरमयं ध्यायन्ति च ज्ञानिनः।

यं सञ्चिन्त्य न जायते न म्रियते नो वर्द्धते हीयते
नैवासन्न च सद्भवत्यति ततः किं वा हरेः श्रूयताम्॥ **58**॥ 492

कव्यं यः पितृरूपधृग्विधिहुतं हव्यं च भुङ्क्ते विभु -
र्देवत्वे भगवाननादिनिधनः स्वाहास्वधासंज्ञिते।
यस्मिन्ब्रह्मणि सर्वशक्तिनिलये मानानि नो मानिनां
निष्ठायै प्रभवन्ति हन्ति कलुषं श्रोत्रं स यातो हरिः॥ **59**॥ 493

नान्तोऽस्ति यस्य न च यस्य समुद्भवोऽस्ति
वृद्धिर्न यस्य परिणामविवर्जितस्य।
नापक्षयं च समुपैत्यविकारि वस्तु
यस्तं नतोऽस्मि पुरुषोत्तममीशमीड्यम्॥ **60**॥ 494

तस्यैव योऽनु गुणभुग्बहुधैक एव
शुद्धोऽप्यशुद्ध इव भाति हि मूर्तिभेदैः।
ज्ञानान्वितः सकलसत्त्वविभूतिकर्ता
तस्मै नमोऽस्तु पुरुषाय सदाव्ययाय॥ **61**॥ 495

ज्ञानप्रवृत्तिनियमैक्यमयाय पुंसो
भोगप्रदानपटवे त्रिगुणात्मकाय।
अव्याकृताय भवभावनकारणाय
वन्दे स्वरूपभवनाय सदाजराय॥ **62**॥ 496

व्योमानिलाग्निजलभूरचनामयाय
शब्दादिभोग्यविषयोपनयक्षमाय।
पुंसः समस्तकरणैरुपकारकाय
व्यक्ताय सूक्ष्मबृहदात्मवते नतोऽस्मि॥ **63**॥ 497

इति विविधमजस्य यस्य रूपं
प्रकृतिपरात्ममयं सनातनस्य।

प्रदिशतु भगवानशेषपुंसां
हरिरपजन्मजरादिकां स सिद्धिम् ॥ 64 ॥ 498

॥ इति श्रीविष्णुपुराणे षष्ठेंऽशे अष्टमोऽध्यायः ॥